श्रीमुनिरत्नसिंहविरचित

# चार लघु स्तोत्र-काव्यो

**सं. मुनि सुयशचन्द्र-सुजसचन्द्रविजयौ**

जैन मुनिओए संस्कृत भाषामां रचेलुं स्तोत्रसाहित्य विपुल तो छे ज, परन्तु वैविध्यपूर्ण पण छे. विविध अलंकारोना प्रयोगो, विविध छन्दोनो उपयोग, पादपूर्ति-रूप काव्यो, एवा एवा अनेक साहित्यप्रकारोनुं सेवन कहो के सर्जन, जैन कविओए खोबले खोबले कर्युं छे. ए बधांनो उपयोग करीने तेमणे मात्र इष्टदेव – गुरुनी स्तुति अने भक्ति ज करी छे, पण कोई भौतिक लाभना आशयथी तेम नथी कर्युं, ते खास नोंधवा योग्य छे. आवा असंख्य स्तोत्रकाव्यो, वीतेलां वर्षोमां प्रकाशित थई ज चूक्यां छे, अने छतां हजी पण हस्तप्रतसंग्रहोमांथी नवां नवां स्तोत्रो प्रकाशमां आवतां ज जाय छे. अहीं आवां चार लघु काव्यो प्रस्तुत करवामां आवे छे. ते चार काव्यो क्रमशः १. श्रीपार्श्वनाथ स्तोत्र, २. श्रीसुजैत्रपुरमण्डनमहावीरजिन स्तोत्र, ३. सर्वजिनसाधारण स्तोत्र, ४.आनन्दलहरी स्तोत्र ए प्रमाणे छे. प्रथम बे स्तोत्रो वसन्ततिलका छन्दमां, त्रीजुं स्तोत्र भुजङ्गप्रयातमां, अने चोथुं शिखरिणी छन्दमां छे. शब्दरचना भक्तिप्रवण होवा साथे प्रासादिक तेमज प्राञ्जल जणाय छे. प्रथम ३ स्तोत्रो स्वतन्त्र रचनात्मक छे, चोथुं स्तोत्र समस्यापूर्तिरूप छे.

ते चोथा स्तोत्रनुं नाम **आनन्दलहरी** छे. आदि शङ्कराचार्ये रचेल, अनेक तन्त्र-यन्त्राम्नाययुक्त देवीस्तोत्र **सौन्दर्यलहरी** ए तन्त्र साहित्यमां तेमज स्तोत्रकाव्योमां शिरमोरसमी रचना गणाय छे. तेनां केटलांक पद्योनां प्रथम तथा अन्तिम चरणोने लई तेनी पादपूर्ति किंवा समस्यापूर्तिरूप स्तोत्ररचना ते आ आनन्दलहरी स्तोत्र. आमां जिनस्तुति करवामां आवी छे. १६ पद्यात्मक आ रचनाना प्रथम पद्यमां ज कर्ताए सौन्दर्यलहरीनां प्रथम-चरम चरणो उद्धरीने जिनस्तुतिनी रचना करवानो पोतानो मनोरथ प्रगट करेल छे. आ स्तोत्र प्रकाशमां आवतां पादपूर्तिसाहित्यमां एक मूल्यवान् कृतिनो उमेरो थाय छे.

स्तोत्र क्र. २ सुजैत्रपुरमण्डन महावीर जिननुं स्तोत्र छे. आ **सुजैत्रपुर** ते कयुं क्षेत्र हशे, ते जाणी शकायुं नथी. जाणकारो ते विषे प्रकाश पाडे तेवी आशा.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आ स्तोत्रकाव्योना प्रणेता मुनि रत्नसिंह छे. दरेक स्तोत्रना छेल्ला पद्यमां तेमणे पोतानो तथा पोताना गुरु–प्रगुरुनो नामोल्लेख ज छे. तेमनो प्राप्य परिचय आ प्रमाणे छे :

तपगच्छना गच्छपति श्रीहेमविमलसूरि (१६मो शतक) ना एक पट्टधर आ सौभाग्यहर्षसूरि हता. सम्भव छे के मुनि रत्नसिंहे उल्लेखेला पोताना प्रगुरु श्री संघहर्ष ते आ सौभाग्यहर्षसूरिना शिष्य होय. गच्छपति आ. हेमविमलसूरि महाराज एकदा विहार दरम्यान कपडवणज पधारेला, त्यांना श्रावक दोशी आणंदजीए तेमनुं शाही ठाठथी एवुं स्वागत कर्युं के तेथी गिण्णायेला कोईके ते समयना सुलतान मुझफ्फरशाह बीजानी आगळ चाडी खाधी; परिणामे शाहे गच्छपतिने पकडावीने केदमां पूराव्या. तेमने छोडाववा माटे, सुलताननी आज्ञा मुजब, १२,०००/- टकानो दंड भर्यो, ते पछी ज तेमनो छुटकारो थयो. आ पछी सूरिवरनी आज्ञा थवाथी तेमना चार विद्वान साधु शिष्यो – हर्षकुल गणि, संयमकुशल गणि, शुभशीलगणि तथा संघहर्ष गणि–ए राजसभामां जई पोताना पाण्डित्यनी चमत्कृति द्वारा शाहने रीझव्यो अने बार हजार टकानो दंड माफ करावी ते रकम संघने पाछी अपावी. आ ऐतिहासिक घटनामां उल्लेखायेला चार साधुओमांना एक संघहर्षगणि ते ज आ स्तोत्रोना कर्ताए अन्तिम पद्यमां निर्देशेला संघहर्ष होय तेम मानी शकाय. संघहर्ष गणिना शिष्य धर्मसिंह गणि थया, तेमणे सं. १५८०मां विक्रमरास रचेलो. तेमना शिष्य मुनि रत्नसिंह ते आ स्तोत्रोना कर्ता. तेमना विषे विशेष जाणकारी प्राप्य नथी. मात्र तेमना शिष्य शिवविजयजी नामे हता, जेमणे तीर्थमाळा बनाव्यानी नोंध सांपडे छे. तेमणे नेमि भक्तामर, पार्श्वकल्याणमन्दिर जेवी कृतिओ पण बनावी होवानुं जाणवा मळे छे.

चार पैकी पार्श्वनाथ स्तोत्रनी प्रति श्रीकैलाससागरसूरि ज्ञान मन्दिर – कोबाथी, क्र. २–३ स्तोत्रोनी प्रति श्री हेमचन्द्राचार्य ज्ञान मन्दिर – पाटणथी तथा आनन्दलहरीनी प्रति स्व.मुनिरत्नाकरविजयजी – ग्रन्थसंग्रह, महुवाथी प्राप्त थयेल छे. जेरोक्स नकल आपवा बदल ते सर्व ग्रन्थ भण्डारोना कार्यकरोनो आभार मानीए छीए.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## ( १ )

# श्री पार्श्वनाथ स्तोत्रम्

कल्याणकेलिसवनाय नमो नमस्ते,
श्रीमत्सरोजवदनाय नमो नमस्ते ।
रागारिवारकदनाय नमो नमस्ते,
वज्राभिरामरदनाय नमो नमस्ते ॥ १ ॥

अम्भोधराभकरणाय नमो नमस्ते,
लोकातिरिक्तिचरणाय नमो नमस्ते ।
संसारवार्द्धितरणाय नमो नमस्ते,
त्रैलोक्यसारशरणाय नमो नमस्ते ॥ २ ॥

सन्निर्मितांह्रिमहनाय नमो नमस्ते,
रागोरुदारुदहनाय नमो नमस्ते ।
विध्वस्तकृत्स्नकुहनाय नमो नमस्ते,
पुण्यद्रुमालिगहनाय नमो नमस्ते ॥ ३ ॥

संसारतापशमनाय नमो नमस्ते,
निर्दाक्ष्यदाक्षदमनाय नमो नमस्ते ।
सुव्यक्तमुक्तिगमनाय नमो नमस्ते,
रूपाभिभूतकमनाय नमो नमस्ते ॥ ४ ॥

पापौघपांशुपवनाय नमो नमस्ते,
सेवापरत्रिभुवनाय नमो नमस्ते ।
क्रोधाशुशुक्षणिवनाय नमो नमस्ते,
संसृत्युदन्वदवनाय नमो नमस्ते ॥ ५ ॥

नेत्राभिमूतकमलाय नमो नमस्ते,
शक्रार्चितांह्रियमलाय नमो नमस्ते ।
निर्नाशिताखिलमलाय नमो नमस्ते,
पद्मोल्लसत्परिमलाय नमो नमस्ते ॥ ६ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीअश्वसेनतनयाय नमो नमस्ते,
सर्वाद्भुतैकविनयाय नमो नमस्ते ।
विख्यातनिक्षितनयाय नमो नमस्ते,
निर्णीतभूर्युपनयाय नमो नमस्ते ॥ ७ ॥

**श्रीसंघहर्ष**सुविनेयक**धर्मसिंह**
पादारविन्दमधुलिण्**मुनिरत्नसिंहः**
**पार्श्वप्रभो**र्भगवतः परमं पवित्रं,
स्तोत्र चकार जनताभिमतार्थसिद्धयै ॥ ८ ॥

॥ इति श्री पार्श्वनाथजिनस्तोत्रम् ॥

( २ )

## श्री सुजैत्रपुरमण्डनमहावीरजिनस्तोत्रम्

तुभ्यं नमः शुभसुजैत्रपुरावतार !,
तुभ्यं नमः कृतसुहृत्सफलावतार ! ।
तुभ्यं नमः प्रणतकामितकल्प ! वीर !,
तुभ्यं नमो वृषविधानविधौ सुधीर ! ॥ १ ॥

तुभ्यं नमः शमरसामृतवारिवाह !,
तुभ्यं नमः शमितदुष्कृतदावदाह ! ।
तुभ्यं नमोऽभव ! भवार्णवकर्णधार !,
तुभ्यं नमः शिवरमाहृदुदारहार ! ॥ २ ॥

तुभ्यं नमः कमलपत्रविलोचनाय,
तुभ्यं नमस्तनुभृतां भवमोचनाय !
तुभ्यं नमोऽनिमिषनाथततिस्तुताय,
तुभ्यं नमो भगवते त्रिशलासुताय ॥ ३ ॥

तुभ्यं नमो भुवनभीततिभञ्जनाय,
तुभ्यं नमस्त्रिजगतीजनरञ्जनाय ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तुभ्यं नमो वृषसरोजविरोचनाय,
तुभ्यं नमः करणभाजितरोचनाय ॥ ४ ॥

तुभ्यं नमः सुरनरासुरसेव्यपाद !,
तुभ्यं नमो घनघनाघनधीरनाद ! ।
तुभ्यं नमः समयसिद्धसरिन्नगेन्द्र !,
तुभ्यं नमः सततसज्जनदत्तभद्र ! ॥ ५ ॥

तुभ्यं नमो मयि विधेहि जयं जिनेश !,
तुभ्यं नमस्तनु शिवं शिवसन्निवेश !
तुभ्यं नमः कुरु कृपां करुणानिधान !,
तुभ्यं नमश्चिनु वृषं विहितावधान ! ॥ ६ ॥

तुभ्यं नमस्तव विभो ! रुचिरं चरितं,
तुभ्यं नमस्तव मत (तं) परमं पवित्रम् ।
तुभ्यं नमो जिन ! जपामि तवैव नाम,
तुभ्यं नमो भवसुखाय सुखैकधाम ॥ ७ ॥

**श्रीसंघहर्ष**सुविनेय**कधर्मसिंह**
पादारविन्दमधुलिण्**मुनिरत्नसिंहः**
श्रीमत्**सुजैत्रपुरवीरजिनेन्द्र**सार-
स्तोत्रं पवित्रमतिचित्रकरं चकार ॥ ८ ॥

॥ इति श्री वीरजिन स्तोत्रम् ॥

(३)

## सर्वजिनस्तोत्रम्

नमस्ते सदानन्दसन्दोहकारिन् !,
नमस्ते नमस्ते गुणव्रातधारिन् ! ।
नमस्ते विभो! विश्वविज्ञातकीर्ते !,
नमस्ते नमस्ते जनाद्वैतमूर्ते ! ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नमस्तेऽन्तरङ्गारिविध्वंसवीर !,
नमस्ते नमस्ते सुपर्वाद्रिधीर !
नमस्ते महानन्दमाकन्दकीर !,
नमस्ते नमस्ते शुगप्पित्तनीर ! ॥ २ ॥

नमस्ते नमन्नाकिनाथस्तुताय,
नमस्ते नमस्ते शिवश्रीयुताय ।
नमस्तेऽघतापस्फुरच्चन्दनाय,
नमस्ते नमस्ते जनानन्दनाय ॥ ३ ॥

नमस्ते महामोहमातङ्गसिंह !,
नमस्ते नमस्ते हतानागरंहः (हताऽनङ्गरंह !) ।
नमस्ते सुधासिन्धुजिद्वाग्विलास !
नमस्ते नमस्ते शिवश्रीनिवास ! ॥ ४ ॥

नमस्ते तमस्तोमनिर्नाशनांशो !,
नमस्ते नमस्ते सुधीदृक्सुधांशो ! ।
नमस्ते समस्तावलोकावबोध !,
नमस्ते नमस्ते कृतक्रोधरोध ! ॥ ५ ॥

नमस्ते सुधारश्मिरम्याननाय,
नमस्ते नमस्ते समस्तावनाय ।
नमस्ते गुणव्याप्तदिग्मण्डलाय,
नमस्ते नमस्ते नताखण्डलाय ॥ ६ ॥

नमस्ते भजे पादपद्मं त्वदीयं,
नमस्ते नमस्ते क्षिपाऽघं मदीयम् ।
नमस्ते विभो ! पाहि मं(मां) दासदासं,
नमस्ते नमस्ते तनु स्वाङ्कवासम् ॥ ७ ॥

**श्रीसङ्घहर्ष**सुविनेयक**धर्मसिंह**–
पादारविन्दमधुलिण्**मुनिरत्नसिंहः** !

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीमज्जिजेश्वरगुणग्रहणप्रसक्तः,
स्तोत्रं चकार रुचिरं चिरभक्तियुक्तः ॥ ८ ॥

॥ इति श्रीसर्वजीनस्तोत्रम् ॥

( ४ )

## आनन्दलहरी

चिदानन्दं नत्वा विशदविधिनाऽऽ**नन्दलहरीं**
सुधाधारासाराममरपदविश्राणनफलाम् ।
ब्रुवे पादं पूर्वं चरममय **सौन्दर्यलहरी**-
स्तवादासाद्योच्चैर्जिनपदगुणग्रामरुचिराम् ॥ १ ॥

तनीयांसं पांसुं तव चरणपङ्केरुहभवं[१],
ललाटे ये भक्तिप्रणतिवशतः साधु ददते ।
लभन्ते ते भव्या जनव(वि)दितजैनेन्द्रपदवीं,
मुकुन्दब्रह्मेन्द्रस्फुटमुकुटनीराजितपदाम्[२] ॥ २ ॥

समुन्मीलत्संवित्कमलमकरन्दैकरसिकं,[३]
प्रभो ! प्राणायामप्रभृतिभिरुपायैर्निजहृदि ।
सनाध्यानासक्तिस्तिमितनयनास्त्वामवितथं,
महान्तः पश्यन्तो दधति परमाह्लादलहरीम्[४] ॥ ३ ॥

शिवं(वः) शक्तिः कामः क्षितिरथ रविः शीतकिरणः[५],
सुखं सत्त्व तत्त्वं त्वमसि मम माहात्म्यमतुलम् !
कृपासिन्धोस्ते तच्चरणपरिचर्याप्रवणधी -
र्भवानि ! त्वद्दासे मयि वितर दृष्टिं सकरुणाम्[६] ॥ ४ ॥

दृशा द्राघीयस्या ह्यविदलितनीलो[१]म्बुजरुचा[७],
सुचारुश्रीमत्त्वद्वदनकमलालोकनपरः ।

टि. श्लोकक्रम तथा पाठांतरोनी नोंध अमे वि. के. सुब्रमण्यम द्वारा सम्पादित सौन्दर्यलहरी ग्रन्थमांथी करी छे. (१) श्लोक.२, पं.१ । (२) श्लो. २२, पं. ४ । (३) श्लो. ३८, पं. १ । (४) श्लो. २१, पं. ४ । (५) श्लो. ३२, पं. ४ । (६) श्लो. २२, पं. १ । (७) श्लो. ५७, पं. १ । १. '**०लोत्पल०**' इति मु.पुस्तके पाठो दृश्यते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्फुरद्भक्त्यासक्त्या पुलकिततनुः श्रीपतिरिव,
श्रियो देव्याः को वा न भवति पतिः कैरपि धनैः[८] ॥ ५ ॥
दवीयांसं दीनं स्नपय कृपया मामपि शिवे[९],
स्पृहासक्तस्वान्तं शुचिसमयवाक्यामृतरसैः ।
अयं पुण्यः पापः किमिति न विधेयं मनसि यद् ,
वने वा हर्म्ये वा समकरनिपातो हिमकरः[१०] ॥ ६ ॥
क्वणत्काञ्चीदामा करिकलभकुम्भस्तनभरा[११],
नितम्बिन्योऽनेका मदनमदहृत्वर्ष्म विरुजम् ।
यशः शुभ्रं दिव्या द्युतिरिह भवत्पत्कजनते।
मधुक्षीरद्राक्षामधुरिमधुरीणा [२]भणितयः[१२] ॥ ७ ॥
महापद्माटव्यां मुदितमलमायेन मनसा[१३],
स्वयं गत्वा भक्त्या सुमु(म)निचयमानीय महसा ।
तवाऽर्चां यः कुर्यात्सकृदपि तदुक्तेन विधिना,
तदैव त्वं तस्मै दिशसि निजसायुज्यपदवीम्[१४] ॥ ८ ॥
भजन्ति त्वां धन्याः कतिचन चिदानन्दलहरी[१५]
पयःपारावारं भवति ननु तेषामथ तदा ।
प्रणाशोऽज्ञानस्य प्रतनघनघोरं यदुदितं,
मुनीनामप्यन्तः प्रभवति हि मोहाय महताम्[१६] ॥ ९ ॥

दरिद्राणां चिन्तामणि[३]गणनिका जन्मजलधौ[१७],
निमज्जज्जन्तूनां प्रवरतरणिः शं वितनुतात् ।
तवाऽमोघा वाणी विशदगुणसन्दोहसुभगा;
जडानां चैतन्यस्तबकमकरन्दै[४]स्नुतिशिरा[१८] ॥ १० ॥

भवात्त्रातुं दातुं फलमपि च वाञ्छासमधिकं[१९],
विना त्वां नो कश्चिद् प्रभुरिह जगन्नाथ ! जगति ।

---

(८) श्लो. ९६, पं. २ । (९) श्लो. ५७, पं. २ । (१०) श्लो. ५७, पं. ४ (११) श्लो. ७, पं. १ (१२) श्लो. १५, पं. १ । २. '**फणितयः**' इति मु. प्रतौ । (१३) श्लो. २१, पं. ३ । (१४) श्लो. २२, पं. ३ (१५) श्लो. ८, पं. ४ (१६) श्लो.५, पं. ४ । (१७) श्लो. ३, पं. ३ । **३.** '**०गुणनिका**' इति मु. प्रतौ । (१८) श्लो. ३, पं. २ । ४. '**०स्नुतिझरी**' इति मु. प्रतौ । (१९) श्लो. ४, पं. ३ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अतस्त्वामेवोच्चैर्गुणगण ! नयामि स्तुतिपथं,
वचोभिर्वाग्देवीवदनकमलामोदमधुरैः[२०] ॥ ११ ॥
हरिस्त्वामाराध्य प्रणतजनसौभाग्यजननी[२१],
यथेच्छं कर्णाभ्यां तव गिरमथापीय मधुराम् ।
यथा मोदं धत्ते मनसि निभृतं नाम न तथा,
सुधामप्यास्वाद्य प्रतिभयजरामृत्युहरि(र)णीम्[२२] ॥ १२ ॥
त्वदन्यः पाणिभ्यामभयवरदो दैवतगणो[२३],
न कोऽपि त्वं वाचा जगदखिलमाह्लादयसि च ।
भवज्वालाजालाकलितवपुषामीश ! मनुजां,
[१]दयार्द्रा दृष्टिस्ते शिशिरमुपचारं रचयति[२४] ॥ १३ ॥
विसा(शा)ला कल्याणी स्फुटरुधिर[२]बोधा कुवलयै[२५]
र्निरौपम्या दृष्टिर्निपतति जने पुण्यवति ते ।
भवद्भक्त्यासक्ते सुरमहितसम्यक्त्वसुभगे,
ददाने दीनेभ्यः श्रियमनिशमाशा(शां)नु सदृशीम्[२६] ॥ १४ ॥
विपद्यन्ते विश्वे विधि-शतमखाद्या दिविषद-[२७]
स्तदा सद्यः पातिन्यहह ! ममता का निजतनौ ?
प्रमादं हित्वाऽतः स्तुतिपथममुं नाम नय भोः !,
कवीन्द्राणां चेतःकमलवनबालातपरुचिम्[२८] ॥ १५ ॥
**श्रीसंघहर्षसुविनेयकधर्मसिंह**
पादारविन्दमधुलिण्**मुनिरत्नसिंहः** ।
शैलात्मजास्तवपदद्वयसन्निबद्धं,
स्तोत्रं चकार परमं परमेश्वरस्य ॥ १६ ॥

**॥ इति श्रीसौन्दर्यलहरीपदद्वयनिबद्धसमस्यया "आनन्दलहरी" नाम श्रीजिनपतिस्तुतिः समासमासेति मङ्गलमालिकाः प्रथयन्तु ॥ श्री वीरजिनप्रसा[दा]त् ॥ श्रीः ॥**

---

(२०) श्लो. १७, पं. ४ । (२१) श्लो. ५, पं. १ । (२२) श्लो. २८, पं. १ । (२३) श्लो. ४, पं. १ । (२४) श्लो. ३९, पं. ४ । १. '**दयार्द्रा या दृष्टिः**' इति मु. प्रतौ । (२५) श्लो. ४९, पं. १ । २. **रुचिरयोध्या०** इति मु.प्रतौ । (२६) श्लो. ९०, पं. १ । (२७) श्लो. २८, पं. २ । (२८) श्लो. १६, पं. १ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org